SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 01/06/2025
Volume – 7
Issue – 1
(ISSN ONLINE:- 2583-7176)
https://samvardhini.in

# शब्दशक्तिविमर्शः

उत्तमप्रसादः खतिवडाः

**लेखसारः**

“अस्मात्पदात् अयमर्थो बोद्धव्य इति ईश्वरसंकेतः शक्तिः”इतिपरिभाषया परिगृहीता निखिलमपि वाङ्मयमभिव्याप्य वर्तमाना शब्दशक्तिरालेखेऽस्मिन् चर्चिता विमर्शिता च । सर्वैः शब्दार्थतत्त्वविद्भिराचार्यैः प्रायः शब्दनिष्ठा त्रिविधा वृत्तिर्वर्णिता विवृता च । कैश्चित्तात्पर्यार्थोऽपि स्वीकृत इति चत्वारोऽर्थाः प्रसिद्धाः । अभिधा-लक्षणा-व्यञ्जनाख्येषु तिसृषु वृत्तिषु अभिधावृत्तेः मुख्यत्वं स्वीकृतम् । अभिधावृत्तिः अभिधाशब्दशक्तिर्वा शब्दस्य प्रथमा शक्तिरस्ति । कमपि शब्दमर्थयितुं प्रथममभिधाख्या शब्दशक्तिर्यतते । तस्मिन् क्षणे पुनः लक्षणा प्रवर्तते । तस्यां चासमर्थायां व्यञ्जना संयुज्यत इति तिसृणामेव शब्दशक्तीनां विनियोगो वाङ्मये बोभवीति । तत्र चाभिधाशब्दशक्तिः सर्वत्र नोपयातीति लक्षणाशब्दशक्तिः साहित्यिकैः स्वीकृता तथा व्यञ्जना चाङ्गीकृता । प्रायः आलेखेऽस्मिन् एत एव विषयाः प्रतिपादिताः, यथायथं विवेचिताश्च । पूर्वाचार्याणां मतान्याश्रित्य विहितमिदमध्ययनं शब्दशक्तिविविदिषूणामध्येतॄणामन्येषामप्युपकारकं सिद्ध्येत् ।

**उत्तमप्रसादः खतिवडाः**

सहप्राध्यापकः
नेपालसंस्कृतविश्वविद्यालयः
दूरभाषा : +९७७-९८४१८२४५९२
इमेल-
up.sharma977@gmail.com

**विशेषशब्दाः**

अजहल्लक्षणा, जहल्लक्षणा, वृत्तिः, व्यञ्जना, व्यापारः, ।

## १. विषयपरिचयः

शक्तिः सर्वैः अपेक्ष्यते, यतो हि अखिलेऽपि जगति शक्तिं विना किमपि कार्यं न निष्पद्यते। निष्पन्नं वा कार्यं सार्थकतां नैव व्रजति। शक्तिश्च सर्वस्मिन्नपि वस्तूनि समानतया विराजते। शक्तिहीनः कोऽपि पदार्थो व्यवहारार्हो न जायते। शब्देऽपि काचिच्छक्तिरनुस्यूतास्ति। सा एव शक्तिः शब्दशक्तिरिति पदवाच्यतां लभते। शक्तिं विना शब्दोऽपि कमप्यर्थं बोधयितुं नैव प्रभवति। किं बहुना कर्तुमकर्तुमन्यथा कर्तुं समर्थोऽपि परमात्मा शक्त्यभावे निष्क्रियो जगदुत्पत्त्यादिष्वसमर्थश्च दरीदृश्यते। 'शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्, न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि' (आनन्दलहरी-१) इत्यादिवचसा सशक्तिकस्यैव तस्य जगत्कारणत्वं प्रदर्शितम्। अतोऽर्थबोधने शब्दोऽपि काञ्चिच्छक्तिं समाश्रयते। शब्दश्चाकाशस्य गुणः। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः।' (बृह. उपनिषद्) इत्युक्तेः आकाशश्च परमात्मनः प्रथमा सृष्टिः अतः सृष्टेः प्रथमोपलब्धिः शब्दः। चराचरलोकसृष्टेरङ्कुरभूतः स च शब्दः कियन्महत्त्वं धत्त इत्यवगच्छन्त्येव विलक्षणविचक्षणाः। यथा वृक्षो बीजमयो भवति तथैव शब्दस्यापि चराचरजगतो रूपत्वात् शब्दमयोऽयं संसार इत्युक्तौ न काचिद्विप्रतिपत्तिः। बीजाभावेऽङ्कुरस्य स्थितिवत् शब्दतत्त्वस्याभावे संसारस्य स्थितिरपि अकल्पनीयैव भवति। जगति त्रयः प्रकाशाः प्रसिद्धाः— अग्निरूपप्रकाशः, ज्ञानरूपप्रकाशः, शब्दरूपप्रकाशश्च। तेषु शब्दरूपप्रकाशः श्रेष्ठः। तेनैव चराचरमभिव्याप्तम्— **त्रयः प्रकाशाः योऽयं जातवेदाः यश्च पुरुषेष्वान्तरः प्रकाशः, यश्च प्रकाशयोः प्रकाशयिता शब्दाख्यः प्रकाशः तेनेदं सर्वमुपनिबद्धं स्थास्नु चरिष्णु च इति**। (वाक्यपदीयम्) वस्तुतः शब्दरूपप्रकाशस्याभावे न कोऽपि व्यवहारः जगति निर्वर्तते। अपि तु सर्वत्रान्धकारस्यैव साम्राज्यं सिध्यति। उक्तञ्च— **इदमन्धं तमः कृत्स्नं जायते भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥** इति (काव्यादर्शः१/४) अस्माभिर्विधीयमाना लौकिका वैदिकाश्च व्यवहाराः शब्दनिष्ठा एव दरीदृश्यते। सर्वाणि च ज्ञानानि शब्दानुस्यूतानि। उक्तञ्च भर्तृहरिणा— **न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥** इति ॥ (वाक्यपदीयम्, ब्रह्मकाण्ड / १२३) प्रकारान्तरेण परब्रह्मशब्दब्रह्मणोः साम्यमनुभूयते। यतो हि सर्वान्तर्यामित्वसर्वव्यापकत्वादिधर्मो यथा परब्रह्मणि तथैव शब्दब्रह्मण्यपि सञ्जाघटितीति। अतः शब्दतत्त्वविदः शब्दातिरिक्तं किमपि वस्तु नाङ्गीकुर्वन्ति जगति। महाभाष्यकारः पतञ्जलिरपि शब्दस्य महिमानमित्थमभिव्यनक्ति— **एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति** ॥ इति। (महाभाष्यम् १, पृ. ५०) एतादृशः शब्दो यस्याः माध्यमेनार्थं प्रकाशयति सा एव शब्दशक्तिपदेनाभिधीयते। यस्याः स्वरूपं सपरिकरमत्र निरूप्यते।

## २. शब्दशक्तिस्वरूपम्

शब्दार्थयोः सम्बन्धद्योतिका व्यापाररूपा वृत्तिरेव शब्दशक्तिरित्युच्यते। यस्याः अभावे कोऽपि शब्दः कमपि अर्थं द्योतयितुं न पारयति। शब्दनिष्ठा शक्तिः कुत्रचित् वृत्तिपदेनापि परिचीयते। वृत्तिश्च

शब्दार्थयोः बोध्यबोधकभावसम्बन्धरूपा एव। अतः शब्दशक्तिः समस्तवाङ्मयस्याधारभूताभिन्नरूपा च वर्तते। नैयायिकाः **अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिरिति** (तर्कसंग्रहःशब्दखण्डः) शक्तिं परिभाषयन्ति। शब्दशक्तिविवेचने सर्वप्रथमं मीमांसकाः संलग्नाः दृश्यन्ते। पूर्वमीमांसाशास्त्रस्य शाबरभाष्ये तथा कुमारिलभट्टविरचिते तन्त्रवार्तिकाख्यग्रन्थे च शब्दशक्तेः स्वरूपं बहूहापोहेन निर्धारितम्। तदनु नैयायिकैः वैयाकरणैश्च चर्चाविषयीकृतेयं शब्दशक्तिः। अतः प्रायशः साहित्यस्य शब्दशक्तिविवेचना चैतेषां त्रयाणां मीमांसान्यायव्याकरणसम्बद्धसिद्धान्तानां पृष्ठभूमावुपजीवितेति अनुभूयते। तत्रापि सम्बद्धविषयविवेचने मूलतः साहित्यशास्त्रमिदं व्याकरणादेव प्रभावितमस्ति। यदा विषयविश्लेषणे सिद्धान्तप्रतिपादने च विवादास्पदप्रसङ्गः समापतति तदा साहित्यशास्त्रिणः सादरं व्याकरणशास्त्रस्यैव शरणं व्रजन्ति, तदनुकूलं समाधानं चाङ्गीकुर्वन्ति। अतः मम्मट— "काव्यास्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः" (ध्वन्यालोकः १/१) "इदमिति काव्यं बुधैर्व्याकरणैः" (का.प्र. १/४) इत्यादिभिः आनन्दवर्धनादिभिराचार्यैः स्वकीये ग्रन्थे **मध्ये मध्ये बुधै**रिति पदेनाभिलक्ष्य वैयाकरणानां प्रति श्रद्धा प्रकटिता। महाभाष्यकारेण च — **प्रधानं व्याकरणं प्रधाने च कृतो यत्नः फलवान् भवतीति** (महाभाष्यम्) उक्तम्। तस्मात् सर्वविद्यानां व्याकरणमूलत्वात् व्याकरणस्य च प्रधानत्वात् अलङ्कारशास्त्रस्य कस्मिँश्चिद् विषये व्याकरणोपजीवित्वं न विरुद्धम्। एतावता सर्वथापि काव्यशास्त्रं व्याकरणाधीनमिति नैव कल्प्यम्। यत्र यत्र व्याकरणेन सह विषयप्रतिपादनं संगच्छते तत्र तदनुसारित्वम्, यत्र च न सम्भवति तत्र शास्त्रान्तरमनुसृत्य तत्सहाय्येनापावृतं स्वकीयं मार्गान्तरं समुद्घाटयति साहित्यम्। प्रकृतविषये च साहित्यशास्त्रेण अभिधाशब्दशक्तिप्रतिपादने व्याकरणशास्त्रस्य साहाय्यमङ्गीकृतं परं व्याकरणशास्त्रे लक्षणानिरूपणाभावात् लक्षणानिरूपणेन च तेन वैयाकरणसृतिं हित्वा मीमांसाशास्त्रस्य साहाय्यमङ्गीकृतम्। ततश्च मीमांसान्याययोः व्यञ्जनावृत्तिर्नाङ्गीकृता। अतः तदङ्गीकरणे च साहित्यं स्वैरस्वकीयमध्वानमवलम्बते। अनेन प्रकारेण साहित्यशास्त्रे तिस्रः शब्दशक्तयः स्वीकृताः सन्ति। साहित्यशास्त्रमृते कुत्रचिदपि शक्तित्रयं नोररीकृतम्। तद्गौरवेणैव शास्त्रमिदं सर्वाण्यतिशेते। यथा शक्तयः तिस्रः सन्ति तथैवात्र शब्दा अपि त्रिधा विभक्ता विद्यन्ते यथाह मम्मटः- "स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा" (का.प्र.२/१)। ते च शब्दाः पृथक् पृथक् वाच्यार्थम्, लक्ष्यार्थम्, व्यङ्ग्यार्थञ्च त्रीन्नर्थान् बोधयन्तीति "अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः।" (साहित्यदर्पणः, २।२) एवम्प्रकारेण विश्वनाथ आह। अनया रीत्या वाचकः शब्दः अभिधाशब्दशक्त्या वाच्यार्थं प्रकाशयति, लाक्षणिकशब्दः लक्षणाशब्दशक्त्या लक्ष्यार्थमवबोधयति, व्यञ्जकशब्दश्च व्यञ्जनाशब्दशक्त्या व्यंग्यार्थं समुद्भावयति इति एतेषां पृथक् पृथक् विषयत्वम्। उक्तञ्च— वाच्यार्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः। व्यंग्यो व्यञ्जनया ताः स्युः तिस्रः शब्दस्य शक्तयः॥ इति (सा.द. २/३)। व्याकरणशास्त्रं शब्दविवेचनं प्रस्तौति। अतः तच्छब्दशास्त्रं पदशास्त्रं वोत्युच्यते। न्यायशास्त्रञ्च प्रत्यक्षादिप्रमाणानि विश्लेषयतीति प्रमाणशास्त्रमभिधीयते, तथा मीमांसाशास्त्रञ्च वाक्यार्थप्रतिपादनशैलीमनुशीलयति, अतस्तस्य वाक्यशास्त्रं नानुचितम्। परं साहित्यशास्त्रं सर्वेषां साहाय्येन मधुरमर्थं प्रकाशयति, व्यञ्जनादिवृत्तिमाध्यमेन भावगतमर्थगतं सौन्दर्यञ्च प्रतिपादयतीति सौन्दर्यशास्त्रम्, अलङ्कारशास्त्रं, काव्यशास्त्रमित्यादिनामधेयान्तरेण

सहृदयसंसदि सम्मानितमस्ति। तस्य साहित्यशास्त्रस्य शब्दशक्तिविवेचनं च प्राणभूतम्। त्रिपथगामिनी गङ्गेव अभिधा-लक्षणा-व्यञ्जनारूपत्रिमार्गेण प्रवाहिता शब्दशक्तिः यथाशास्त्रं यथामति चोपस्थाप्यतेऽत्र।

## ३. शब्दशक्तेर्भेदनिरूपणम्

शब्दे निहितानिर्वचनीया शक्तिरेव शब्दशक्तिपदेन व्यवह्रियते। शक्त्यभावे कोऽपि शब्दो अर्थं निर्धारयितुं नैव प्रभवति। मीमांसादिग्रन्थेषु तु शक्तिनामकोऽपरपदार्थः एवाङ्गीकृतो विलोक्यते। शब्दनिष्ठा कस्यापि शब्दस्यार्थबोधनानुकूला वृत्तिव्यापारादिपदान्तरैरपि बोध्या काचित् पदार्थोपस्थापिका वृत्तिरेव शक्तिपदेन स्वीक्रियते। सा च शब्दशक्तिः सामान्यतया अभिधालक्षणाव्यञ्जनाभेदेन त्रिविधा परिकीर्तिता।

### अभिधाशब्दशक्तिः

वाचकः शब्दो यया वृत्त्या शक्त्या वा वाच्यार्थं द्योतयति सा एव अभिधा शब्दशक्तिरित्युच्यते। अभिधाशब्दशक्तिश्च शब्दस्य प्रथमा वृत्तिरस्ति। या वाचकशब्दाधीना भवति। वाचकशब्दश्चाव्यवधानेन गृहीतसङ्केतं जात्यादिरूपमर्थं बोधयति। उक्तञ्च— "साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः ॥" इति (का.प्र. २।७)॥ साक्षात्सङ्केतितार्थश्च शब्दस्य मुख्यः प्रथमश्चार्थो भवति। अतः शब्दस्य प्रथमार्थस्य बोधिका वृत्तिरेवाभिधाशब्दशक्तिरिति मुक्तकण्ठं वक्तुं शक्यते। उक्तञ्च विश्वनाथेन — "तत्र सङ्केतितार्थस्य बोधनादग्रिमाभिधा ॥" इति (सा.द.२/४) ॥ प्रसङ्गेऽस्मिन्— सङ्केतितार्थः कतिविधः? सङ्केतग्रहश्च कथं भवति? इत्यनुयोगो जिज्ञासाविषयः। अतस्तद्विषयविवेचनमप्यत्र नाप्रासङ्गिकमिति संक्षेपेणोपस्थाप्यते। कुत्र सङ्केतग्रहो भवतीति विषये विदुषां वैमत्यमस्ति। वैयाकरणाः जातिगुणक्रियाद्रव्येषु संकेतग्रहं स्वीकुर्वन्ति तथा मीमांसकाः जातौ एव सङ्केतग्रहो भवतीति आमनन्ति। एवञ्च बौद्धाः अपोहरूपपदार्थ एव सङ्केतग्रहस्य विषय इत्यालपन्ति। तेषां मते अपोहश्च अतद्व्यावृत्तिरूपः तद्भिन्नभिन्नत्वरूपो वा पदार्थः। एवमेव नैयायिकाश्च जातिविशिष्टव्यक्तिरेव सङ्केतग्रहस्याश्रय इत्युररीकुर्वन्ति। परं साहित्यिकाः एतान्यन्यानि मतान्तराणि परिहृत्य सर्वेषां वाङ्मयानां व्याकरणमूलत्वादलङ्कारग्रन्थेषु प्रायेण तदनुगतेनैव व्यवहाराच्च व्याकरणसम्मतमेव मतं समादरन्ति। अत एव मम्मटोऽपि — "सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ॥" इति (का.प्र. २।८) ॥ जातिगुणक्रियायदृच्छारूपाः सङ्केताश्रया इत्यभिव्यनक्ति। महाभाष्ये च पतञ्जलिः गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्च इति (महाभाष्यम्) सङ्केतग्रहविषयं विशदीकरोति। अतो जातौ सङ्गेतग्रहोऽपि तु उपाधौ इति सिद्धम्। कविराजविश्वनाथोऽपि तदेव समर्थयति – "सङ्केतो गृह्यते जातौ द्रव्यगुणक्रियासु च ॥" (सा.द. २।४) इति। एवमेव सङ्केतग्रहस्य शक्तिग्रहस्य वा साधनं च व्याकरणादिकं प्रसिद्धमेव —

**शक्तिग्रहं व्याकरणोपमानात् कोशाप्तवाक्याद्व्यावहारतश्च।**

**वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥ इति । *(मुक्तावली)***

अनया रीत्या गृहीतसङ्केतः शब्द एव अभिधाशब्दशक्तेराश्रयो भवति । वाच्यार्थबोधका वाचकशब्दाश्च त्रिधा विभक्ताः सन्ति — यौगिकशब्दः, रूढशब्दः, योगरूढशब्दश्च । तत्र अवयवशक्तिमात्रसापेक्षं पदस्यैकार्थप्रतिपादकत्वं यौगिकत्वम् । यथा पाचकादिशब्दानाम् । अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढत्वम्, यथा पुस्तकादिशब्दानाम् । उक्तञ्च— व्युत्पत्तिरहिताः शब्दाः रूढाः, आखण्डलादयः इति । (संस्कृतहिन्दीकोशः, पृ. ८६०) एवञ्च अवयवसमुदयोभयशक्तिसापेक्षमेकार्थप्रतिपादकत्वं योगरूढत्वम् । यथा– पङ्कजादिशब्दानाम् । अतोऽभिधाशब्दशक्तिरपि त्रिविधा वर्णिता । **सेयमभिधा त्रिधा केवलावयवशक्तिः, केवलसमुदायशक्तिः, समुदायावयवशक्तिसङ्करश्चेति** । (रसगङ्गाधर २) पण्डितराजश्च अभिधाशब्दशक्तिं पृथग्रूपेण परिचाययति — शक्त्याख्योऽर्थश्च "**शब्दगतः, शब्दस्यार्थगतो वा सम्बन्धविशेषोऽभिधा । इति** ।" वस्तुतः शब्दस्य मुख्या वृत्तिरेवाभिधा । प्रथममभिधाशक्तिरेवार्थमाकलयति स चार्थो मुख्यो भवति । उक्तञ्च मुकुलभट्टेन— "**स हि यथा सर्वेभ्यो हस्तादिभ्योऽवयवेभ्यः पूर्वं मुखमवलोक्यते तद्वदेव सर्वेभ्यः प्रतीयमानेभ्योऽर्थान्तरेभ्यः पूर्वमवगम्यते । तस्मान्मुखमिव मुख्यः इति ।**" (अभिधावृत्तिमात्रिका, मुकुलभट्टः) मम्मटश्च - **स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ।** (का. प्र. २।८) इति परिपोषयति । अतः प्रसिद्धार्थस्य बोधिका शब्दशक्तिरेवाभिधा इति स्थितम् ।

**लक्षणाशब्दशक्तिः**

लते ज्ञायतेऽनया इति व्युत्पत्या लक्षणाशब्दो निष्पद्यते। लक्षणाशब्दशक्तिश्च लक्ष्यार्थं बोधयति। वस्तुतः लक्षणाशब्दशक्तिः शब्दस्य द्वितीया वृत्तिरस्ति । यत्र शब्दः अभिधावृत्त्या पदार्थोपस्थापयितुमक्षमस्तत्र लक्षणावृत्तिमाश्रयति । लक्षणायाः बीजं किम् ? इति विषयेऽपि आचार्याणां मतवैविध्यं विद्यत एव । आचार्यविश्वनाथोऽन्वयानुपपत्तिरेव लक्षणायाः बीजमिति मनुते । तथान्ये च तात्पर्यानुपपत्तिं लक्षणाबीजरूपेण समूहन्ते । विश्वनाथानुसारं चाभिधेयार्थान्वयनुपपत्तिग्रहत्वे सति रूढिप्रयोजनान्यतरप्रयोज्यमुख्यार्थसम्बन्धवत्तदतिरिक्तार्थप्रतिपादकशक्तित्वं लक्षणात्वमिति । उक्तमेव –

**मुख्यार्थवादे तद्युक्तो यथोऽन्योऽर्थः प्रतीयते ।**
**रूढेः प्रयोजनाद् वासौ लक्षणशक्तिरर्पिता ॥ इति *(सा. द. २।५)***

लक्षणायां च हेतुत्रयमपेक्षते— मुख्यार्थबाधः, मुख्यार्थयोगः, रूढिप्रयोजनान्यतरच्चेति । अत्र मुख्यार्थबाधमुख्यार्थयोगयोर्मिलितयोरेव कारणत्वम्, रूढिप्रयोजनयोश्च प्रत्येकमेव कारणत्वम् बोध्यम् । मम्मटश्च लक्षणामित्थं लक्षयति —

**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।**
**अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥ इति । *(का.प्र. २।९)***

मुख्यार्थस्य बाधे सति मुख्यार्थेन सह साक्षात्सम्बन्धे च सति प्रसिद्धेः प्रवाहात् अथवा प्रयोजनात् यया वृत्त्या मुख्यार्थभिन्नोऽन्योऽर्थो लभ्यते प्रतिपाद्यते वा सा लक्षणेत्यर्थः । रूढिलक्षणा यथा–

**कलिङ्ग साहसिकः** इत्यादौ कलिङ्गादिशब्दः देशविशेषपरः, देशविशेषदिरूपार्थस्य च अचेतनतया साहसिकाद्यर्थेनान्वयानुपपत्त्या तात्पर्यानुपपत्त्या वानुपपद्यमानप्रयोगात् मुख्यार्थे बाधात् तत्सम्बद्धान् स्थितान् पुरुषान् लक्षयतीति अत्र रूढिलक्षणा । एवञ्च गङ्गायां घोषः इत्यत्र भगीरथरथखातावच्छिन्नजलप्रवाहरूपेऽर्थे घोषासम्भवात् तत्सम्बद्धतटे लक्षणा तथात्र शीतत्वपावनत्वातिशयस्य बोधनरूपं प्रयोजनं च सिद्धमिति प्रयोजनवती लक्षणा निर्बाधा । इत्थं रूढिप्रयोजभेदात् द्विधापन्ना लक्षणा उपादानलक्षणभेदात् पुनः द्वैविध्यमाप्नोति । उपादानलक्षणां विश्वनाथो लक्षयति यथा—

**मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वय सिद्धये।**
**स्यादात्मनोऽप्युपादानादेवोपादानलक्षणा ॥ इति।** ***(सा.द. २/६)***

या स्वार्थमपरित्यज्यान्वयसिद्धये मुख्यार्थव्यतिरिक्तार्थमपि आदत्ते सोपादानलक्षणा । इयमेवाजहल्लक्षणेति नाम्नापि परिज्ञायते। यथ **काकेभ्यो दधि रक्ष्यताम्** इत्युक्तौ काकेभ्यस्तथा दध्युपघातकेभ्यो मार्जारश्वादिभ्यश्च दधिरक्षणमपेक्षितमिति अत्रोपादानलक्षणा । लक्षणलक्षणा चान्यार्थमात्रप्रतिपादकशक्तिरूपा। यथाह विश्वनाथः–

**अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।**
**उपलक्षणहेतुत्वादेषा लक्षणलक्षणा ॥ इति।** ***(२/७ )***

यत्र मुख्यार्थं तिरस्कृत्य लक्ष्यार्थमेव विशेषतः प्रतिपाद्यते तत्र लक्षणलक्षण भवति। मुख्यार्थस्य पूर्णतो त्यागादियं जहत्स्वार्था, जहल्लक्षणा वेति नाम्नापि ज्ञायते। यथा गङ्गायां घोषः इत्यत्र गङ्गापिदं जलप्रवाहरूपमर्थं पूर्णतः तिरस्कृत्य तटरूपमर्थं लक्षयतीति अत्र लक्षणलक्षणा। यथा वा

**उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।**
**विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥ इति।** ***(सा.द.२/७)***

अत्र मुख्यार्थं हित्वा विपरीतार्थो लक्षितोऽतोऽत्र लक्षणलक्षणा फलतीति । एवं भेदोपभेदादिभिर्लक्षणेयं बहुविधा। न्यायव्याकरणमीमांसादिशास्त्रेष्वपि एतस्याः भेदोपभेदादीनां विषये चर्चा विहिता। साहित्यिका अपि लक्षणाभेदविषये नैकत्र स्थिताः। आचार्यो मम्मटः लक्षणां षड्विधां व्यभिनत्। विश्वनाथश्च पूर्वं चत्वारिंशद्भेदान् प्रदर्श्य तानपि पदगतवाक्यगतत्वेन भित्त्वा अशीतिप्रकारकान् दर्शयामास। तेषां भेदानां प्रदर्शनं ग्रन्थविस्तारभयान्नोचितमिति मत्वात्र ते भेदाः नैव प्रदर्शिताः। एवं भिन्ना लक्षणा वाक्यतात्पर्यज्ञापने बहूपयोगिनी विद्यते । केचित् **शक्यसम्बन्धो लक्षणा** इति लक्षणां परिचाययन्ति । शास्त्रेषु सर्वत्र स्वीकृता, समादृता च लक्षणा शब्दशक्तिः समेषां वाक्यार्थप्रतिपित्सूनामुपकारिणीति करामलकम्।

**व्यञ्जनाशब्दशक्तिः**

व्यञ्जना नाम शब्दस्य तृतीया वृत्तिरस्ति । शक्तिरियमभिधां लक्षणां चातिक्रम्य ताभ्यामप्रकाशितं विलक्षणं सौन्दर्यास्पदं गूढञ्चार्थमभिव्यनक्ति । साहित्यशास्त्रस्य त्वियं स्वीया स्वतन्त्रा स्वेतरभेदसाधिका वृत्तिर्विद्यते । अभिधालक्षणयोः शब्दनिष्ठत्वं परमस्याः शब्दार्थोभयनिष्ठत्वं बोध्यम्। व्यञ्जनां लक्षणयता विश्वनाथेन चाभिहितम्—

**विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः।**
**सा वृत्तिर्व्यञ्जनानाम शब्दस्यार्थादिकस्य च॥ इति**। (सा. द. २।१२)

संक्षेपेण अभिधेयादिभिन्नार्थोपस्थापकवृत्तित्वं व्यञ्जनात्वमिति लक्षणं पर्यवसितम्। **सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति**। इति न्यायात् स्वं स्वमर्थमुक्त्वा उपक्षीणासु अभिधादिवृत्तिषु व्यञ्जनावृत्तिरभिनवमर्थं समुद्भावयति। यथैवोक्तम्– **शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः इति नयेनाभिधालक्षणातात्पर्याख्यासु तिसृषु वत्तिषु स्वं स्वमर्थमुक्त्वोपक्षीणासु यया अपरोऽन्योऽर्थो बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च शक्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम। इति** (सा. द. २।१२। वृत्तिः) परमलघुमञ्जूषाकारो नागेशभट्टश्च **मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बन्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना।** (परमलघुमञ्जूषा) इत्यवोचत्। सा च व्यञ्जना द्विविधा **शाब्दीव्यञ्जना, आर्थीव्यञ्जना च**। तत्र शाब्दीव्यञ्जनापि द्विविधा **अभिधामूला, लक्षणामूला** च। यत्रानेकत्र गृहीतशक्तिकस्य शब्दस्य संयोगादिभिर्नियामकैरेकस्मिन्नर्थे नियमिते सति अभिधया प्रतिपादयितुमशक्यार्थस्य बोधो भवति तत्र अभिधामूला शाब्दीव्यञ्जना ज्ञेया। उक्तञ्च मम्मटेन–

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।**
**संयोगाद्यैरवाच्यार्थधीकृद्व्यावृतिरञ्जनम्॥ इति** (का.प्र. २।१९)

अर्थनियामकाः संयोगादयश्च भर्तृहरिणा उक्ता एव–

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ इति**। (वाक्यपदीयम्)

यथा सशङ्खचक्रो हरिः इत्यत्र हरिशब्दो बहुष्वर्थेषु दृश्यते।

**हरिश्चन्द्रार्कवाताश्वशुकभेकयमादिषु।**
**कपौ सिंहे हरेऽजेऽसौ शक्रे लोकान्तरे पुमान्॥** इति।

कोशवाक्यादनेकार्थस्य हरिशब्दस्य शङ्खादिसंयोगेन विष्णौ नियमनम्, अन्यार्थस्य व्यवच्छेदश्च क्रियते। एवमेव **अशङ्खचक्रो हरिः** इत्यत्र च शङ्खविप्रयोगेन विष्णुरूपार्थस्यैव ग्रहणम्। अनया रीत्या साहचर्यादिष्वपि सर्वत्रोह्यम्। विस्तारभयादत्र तद्विवरणं नोपस्थाप्यते। तथा च यत्र लक्षणावृत्त्यार्थबोधानन्तरमर्थान्तरस्य बोधो भवति तत्र लक्षणामूला शाब्दीव्यञ्जना भवति। अथवा लक्षणाहेतुभूतप्रयोजनबोधकत्वं लक्षणामूलशाब्दीव्यजनत्वमिति। यथाह विश्वनाथः–

**लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।**
**यया प्रत्याय्यते सा स्याद् व्यञ्जनालक्षणाश्रया॥ इति**।(सा.द. २।१५)

यथा **गङ्गायां घोषः** इत्यत्र लक्षणावृत्त्या तटरूपार्थबोधानन्तरं पुनः शीतत्वपावनत्वाद्यर्थानामभिव्यक्तिर्भवतीति लक्षणमूलाशाब्दीव्यञ्जना । एवञ्च यत्र प्रकरणदेशकालादिसाहायय्येन वाच्यार्थेभ्यश्चमत्कारपूर्णार्थान्तरस्याभिव्यक्तिर्भवति तत्र आर्थीव्यञ्जना बोध्या।

**वक्तृबोद्धव्यवाक्यानां काकोश्चेष्टादिकस्य च ।**
**वैशिष्ट्यादन्यमर्थं या बोधयेत् सार्थसम्भवा । इति ।** (सा.द. २।१६)

अर्थानां त्रैविध्यात् सामान्यतया आर्थीव्यञ्जनापि त्रिविधा भवति – *त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता ।* इति । (सा.द. २।१७) अर्थानां व्यञ्जकत्वमपि न विरुद्धम् – **सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते । इति ।** (का.प्र. २।७) एवं वाच्यव्यञ्जना, लक्ष्यव्यञ्जना, व्यङ्ग्यव्यञ्जना चेति त्रिविधा निष्पन्ना।

वाच्यव्यञ्जना च यथा–

**कालो मधुः कुपित एष च पुष्पधन्वा**
**धीरा वहन्ति रतिखेदहराः समीराः ।**
**केलीवनीयमपि वञ्जुलकुञ्जमञ्जु–**
**दूरे पतिः कथय किं करणीयमद्य ।।** इति। (सा.द. २,पृ.७४)

अत्र देशकालादिमाध्यमेन वक्तृबोद्धव्यादिसाहाय्येन च वाच्यार्थात् कामाभिलाषरूपं पृथगर्थान्तरमभिव्यक्तगतो वाच्यव्यञ्जना । **निःशेषच्युतचन्दनं स्तनतटम्** (का.प्र. १।४) इत्यादौ च लक्ष्यार्थात् व्यङ्ग्यार्थस्योद्भावनमस्ति इति लक्ष्यव्यञ्जना । यथा **पश्य निश्चलनिष्पन्दा...** (का.प्र. २।८) इत्यादौ व्यङ्ग्यार्थात्तदभिन्नमर्थान्तरं ध्वनितमिति व्यङ्ग्यव्यञ्जना । सामान्यतया त्रिधापन्ना व्यञ्जना भेदोपभेदै साहित्यग्रन्थेषु बहुधापन्ना दृश्यते। साहित्यशास्त्रसर्वस्वभूतेयं व्यञ्जना इतोऽपि विचारणीयास्ति।

## ४. उपसंहार

पौरस्त्यलक्षणग्रन्थेषु सर्वत्र शब्दशक्तेः स्वरूपं स्वकीयं चिन्तनं चाचार्यैः सोहापोहं यावद्बुद्धिबलं प्रस्तुतमवलोक्यते। शब्दनिष्ठशक्तिरेव शब्दशक्तिः। सा च त्रिविधा परिकीर्तिता – अभिधाशब्दशक्तिः, लक्षणाशब्दशक्तिः, व्यञ्जनाशब्दशक्तिश्च । अत्र शक्ति इत्यस्य पर्यायवाचित्वेन वृत्ति-व्यापारादिशब्दानामपि प्रयोगः प्राप्यते। यथा- अभिधावृत्तिः, अभिधाव्यापार इत्यादि। विशेषतः ग्रन्थेषु शक्तिशब्दस्यैव प्रयोगः श्रूयते व्यवह्रियते च । अभिधाशब्दशक्तिः शब्दस्याद्या शक्तिर्विद्यते । मुख्यावृत्तिश्चास्ति । ततो लक्षणावृत्तिस्ततश्च व्यञ्जनावृत्तिरिति एतासां क्रमः । निखिलं जगत् शब्दार्थमयमस्ति । शब्दार्थयोश्चान्योन्याश्रयः सम्बन्धः परिकल्प्यते । सम्बन्धश्च शक्त्यधीनोऽस्तीति शब्दशक्तिरेव व्यवहारसाधिका ज्ञानमूला विद्यते। अभिधालक्षणाव्यञ्जनाख्याः तिस्रो वृत्तयः शब्दस्य सन्ति चेत् वाक्यस्य तात्पर्याख्या वृत्तिरपि विद्यते। (विश्वनाथः, ई. १९७५, पृ. १२०) सा च वाक्यार्थं निश्चिनुते। यावदभिधादिवृत्तयः पदार्थान् नोपस्थापयन्ति तावत् तात्पर्यवृत्तिः वाक्यार्थं नैव परिकलयत इति अभिधादीनामपरिहार्यत्वं विनिश्चितम् । एक एव शब्दः अभिधादीनवलम्ब्योत्तरोत्तरमभिनवं विलक्षणञ्चार्थं प्रकटयितुं कल्प्यत इत्येतासां महिमानं को निवारयति । सामान्या जनाः स्वहृद्गतं

भावमभिधामाश्लिष्याभिव्याहरन्ति चेत्, अन्ये लक्षणां स्वीकृत्याभिलक्षयन्ते। एवं साहित्यशास्त्रनिपुणाः वाग्व्यापारविदग्धाः कोविदाः व्यञ्जनां समासाद्य विविधानर्थान् व्यञ्जन्ति इति एतेषां वैलक्षण्यम्।

**सन्दर्भग्रन्थाः**


अन्नंभट्टः, (ई. १९७८) तर्कसंग्रहः, वाराणसी; चौखम्बा विद्याभवन।

अप्पयदीक्षितः, (ई. १९९९), वृत्तिवार्तिकम्, वाराणसी; चौखम्बा विद्याभवन

आनन्दवर्धनः, (ई. १९६०), ध्वन्यालोकः, वाराणसी; चौखम्बा विद्याभवन।

जगन्नाथः, (ई. १९४८), रसगङ्गाधरः, वाराणसी; चौखम्बा सुरभारती प्रकाशन।

भर्तृहरिः, (२००३), वाक्यपदीयम्, वाराणसी; चौखम्बा विद्याभवन।

दण्डी, (२००२), काव्यादर्शः, वाराणसी, सुरभारती प्रकाशन।

मम्मटः, (२०५६), काव्यप्रकाशः, वाराणसी; चौखम्बा संस्कृत संस्थान।

पतञ्जलिः, (२००३), महाभाष्यम्, वाराणसी; चौखम्बा विद्याभवन।

जगन्नाथः, (ई. १९४८), रसगङ्गाधरः, वाराणसी; चौखम्बा सुरभारती प्रकाशन।

मुकुलभट्टः, (ई. १९९२), अभिधावृत्तिमातृकाः, वाराणसी; चौखम्बा विद्याभवन। ; चौखम्बा विद्याभवन।

विश्वनाथः, (ई१९७५), साहित्यदर्पणः, वारणसी; चौखम्बा विद्याभवन।